संस्कृत-वार्ता:

15.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- राजनीतिकदलानां तारकप्रचारका: स्वकीयानां लोकसभा-निर्वाचन प्रत्याशिनां पक्षे प्रचाराय अहोरात्रं प्रयतन्त: सन्ति।
- अष्टादशतमाया: लोकसभाया: सामान्यनिर्वाचनात् प्राक् प्रवर्तनसंस्थाभि: सार्धषड्शतोत्तर-चतुस्सहस्रकोटि-रूप्यकाणां चलाचलसम्पत्ति: स्थिरीकृत्वा कीर्तिमत् स्थापितम्।
- अद्य उपराष्ट्रपतिना जगदीपधनखड़ेन ए.आई. इत्याख्यां कृत्रिमबुद्धिमत्तां रेखाङ्कयता प्रोक्तं यत् एतादृशा: उन्नतप्रौद्योगिक्य: करसंधानादिप्रकरणेषु प्रशासनस्य सहायिका: सन्तीति।
- भारतीयसैन्यप्रमुख: जनरल-मनोज-पाण्डेय: अद्यारभ्य: उज्बेकिस्तानदेशस्य चतुर्दिवसीय-यात्रायां प्रयाति।
- आई.पी.एल. क्रिकेट क्रीडामालायां रॉयलचैलेन्जर्स बैंगलुरूदलम् अद्य बेंगलुरूस्थे एम.चिन्नास्वामीक्रिकेट क्रीडाङ्गणे सनराईजर्स हैदराबाद इति दलेन सह संघर्षो विधास्यति।

<u>निर्वाचन-प्रचार:</u>

नैकेषां राजनीतिकदलानां तारकप्रचारका: स्वकीयानां लोकसभा-निर्वाचन प्रत्याशिनां पक्षे प्रचाराय अहोरात्रं प्रयतन्त: सन्ति। लोकसभाया: द्वितीय-चरणीय-मतदानाय भाजपेति दलनेता प्रधानमन्त्री च केरलाप्रान्तस्य चेकवत्तानि इत्यत्र नैर्वाचनिकसभाम् सम्बोधितवान्। द्वितीयचरणीयमतदानम् अपैलमासस्य षड्विंशे दिवसे भविता। भाषमाण: प्रधानमन्त्री उक्तवान् यत् वामीनि प्रशासनानि केन्द्रप्रशासनस्य विकासयोजना: दक्षिणवर्तिभ्य: राज्येभ्य: संगोपयन्ति। परं भाजपेति दलस्य प्राथमिकता वर्तते यत् समाजस्य अन्तिमसोपानस्थं जनं यावत् विकासस्य सौविद्ध्यानाञ्च प्रापणमिति। श्रीमोदी अवोचत् यत् संभाावितानि लोकसभाया: सामान्यनिर्वाचनानि भारतस्य शताब्दाय उन्नतिपथं प्रदर्शयिष्यन्तीति। तेनोक्तं यत् भाजपाया: घोषणापत्रं भारतं शक्तियुतकरणाय प्रयतते, कांग्रेस-दलस्य च घोषणापत्रं राष्ट्रं निश्शक्तं करोति। भाजपया देशोऽयं सशक्त: विहित:। देशस्य सशक्तिकरणाय जना: भाजपा इत्यस्मै दलाय मतदानं कुर्यु:। तथैव वायनाड-लोकसभाप्रत्याशिना गांधीराहुलेनापि नैकेषु नैर्वाचनिक-सम्मर्देषु भाग: गृहीत:। अस्मिन्नेव प्रदेशे सीताराम येचुरी, प्रकाशकरातादिनापि प्रचाराभियानानि प्रचालितानि।

सिलिगुड़ी क्षेत्रे केन्द्रीयमन्त्रिणा अनुरागसिंह् ठाकुरेण क्रीडासम्बन्धितैः व्यक्तिभिः सह मेलन-पुरस्सरं नैर्वाचनिकसभापि सम्बोधिता।

त्रिपुरायाञ्च निर्वाचनाभियानस्य भाजपादलीयदायित्वं केन्द्रीयगृहमन्त्रिणा अमितशाहेन निभालितम्। अद्य सः एकस्यां सभायां प्रावोचत् यत् नरेन्द्रमादिनः नेतृत्वे राष्ट्रिय-जनतांत्रिक-संघस्य प्रशासनं त्रिपुराप्रदेशस्य विकासाय कटिबद्धमस्तीति। सः ऊनाकोटि-जनपदस्य कुमारघाटे जनसभां संबोधयन्नासीत्। श्रीशाहेन भणितं यत् आदिमजनानां सम्मानाय, सुरक्षणाय, समाहितविकासाय च श्रीमता मोदिना नैकाः विकासयोजनाः क्रियान्विताः कृताः सन्ति। तेनोक्तं यत् स्वतन्त्रतायाः पञ्चसप्ततिवर्षेषु पप्रथमतया एका आदिमजनजातीया महिला भारतस्य राष्ट्रपतिः सञ्जातास्ति। वरिष्ठेन भाजपादलनेत्रा प्रोक्तं आदिमजनजातीय-जनानां कल्याणाय कल्याणनिधिः सातत्येन वृद्धिमास्यति। सहैव हि राज्येऽस्मिन् कांग्रेस सहित सीपीआई (एम) इत्यादीनां-नेतृभिरपि दलप्रत्याशिनां पक्षे मतदानाय प्रचाराभियानानि प्रचालितानि।

<u>निर्वाचनायोग-धननिग्रहणस्य कीर्तिमत्</u>

अष्टादशतमायाः लोकसभायाः सामान्यनिर्वाचनात् प्राक् प्रवर्तनसंस्थाभिः सार्धषड्शतोत्तर-चतुस्सहस्रकोटि-रूप्यकाणां चलाचलसम्पत्तिः स्थिरीकृत्वा कीर्तिमत् स्थापितम्। निर्वाचनायोगेन निगदितम् यत् अयं राशिः गतलोकसभायाः समग्रस्य निर्वाचनास्य काले गृहीतस्य राशेरपि अधिकः वर्तते। सम्प्रति उपक्रमोऽयं सजवं प्रवर्तते एव। अस्मिन् राशौ पञ्चचत्वारिंशत् प्रतिशतन्तु मादकद्रव्यादीनामस्ति। आयोगेन प्रकरणेऽस्मिन् उक्तमस्ति यत् साफल्यमिदं जनसहभागेन सार्धं व्यापकयोजनया, विभिन्नानाम् अभिकरणानां ऐक्यभावेन च कृतप्रयासैः समधिगतमस्तीति।

<u>नागपुर-उपराष्ट्रपतिः</u>

अद्य उपराष्ट्रपतिना जगदीपधनखड़ेन ए.आई. इत्याख्यां कृत्रिमबुद्धिमत्तां रेखाङ्कयता प्रोक्तं यत् एतादृशाः उन्नतप्रौद्योगिक्यः करसंधानादिप्रकरणेषु प्रशासनस्य सहायिकाः सन्तीति। येन प्रशासनतन्त्रेषु करदातृणां विश्वासोऽभिवर्धते। येन अधिकतया करानुपालनमपि प्रोत्साहयिष्यते। श्रीधनखड़ः नागपुरस्थे राष्ट्रिय-प्रत्यक्ष-कर-अकादमी एन.ए.डी.टी. इत्यत्र भारतीय-राजस्व-सेवायाः षट्सप्ततितम-प्रकल्पसमूहाय आयोजिते प्रेरण-प्रशिक्षणसत्रस्य समापनसमारोहे भाषमाणः आसीत्।

## सेना प्रमुख: - उज्बेकिस्तान

भारतीयसैन्यप्रमुख: जनरल-मनोज-पाण्डेय: अद्यारभ्य: उज्बेकिस्तानदेशस्य चतुर्दिवसीय-यात्रायां प्रयाति। रक्षामन्त्रालयेन प्रोक्तं यत् अस्या: यात्राया: उद्देश्यमस्ति उभयोर्देशयो: पारस्परिकी सहमति: स्थापिता स्यात्, द्विपक्षीय: रक्षासहयोगश्च सुदृढो भवेदिति। श्री पाण्डेय: तत्र उज्बेकिस्तानदेशस्य शीर्षेण रक्षानेतृत्वेन सह संवादे सम्मिलितो भविष्यति। यो हि सुदृढसैन्यसहयोगस्य वरीवर्धने महत्वपूर्ण: अस्तीति।

## विदेशमन्त्री-जयशंकर

विदेश-मन्त्री डॉ. एस.जयशंकर: उक्तवान् यत् राष्ट्रस्य-प्रगति: केवलं एकेन अनुभविना नेत्रा एव कर्तुं शक्यते, य: साहसिक-पदक्षेपणे शक्त: महत्विचारयुतश्च भवेत्। स: वैश्विक-विचारान् जानीयात्, सम्मान धारणे च सक्षम:, निर्धानानां यूनां च आकांक्षाभिपूरणे श्रमं कुर्यात्। अद्य बेंगलुरू-नगरे वार्ताहारान् सम्बोधयन् डॉ. एस. जयशंकर: प्रधानमन्त्रिणं श्रीनरेन्द्रमोदिनं देशस्य नेतृत्वाय सक्षमनेता अस्तीति स्पष्टं कृतवान्। डॉ.एस.जयशंकर: यूक्रेन-गाजा इत्येतयो: विषये प्रोक्तवान् यत् रक्तसागर-अर्बुदसागर-क्षेत्रयो:, भारत-प्रशान्त क्षेत्रस्य च स्थिति: चिन्तापूर्णा वर्तते।

## भारत-तिब्बत-सीमा

गृह-मन्त्रालयेन उक्तं यत् चीन-नियन्त्रित-लद्दाखक्षेत्रे चीनदेशस्य अतिक्रमणे भारत-तिब्बत-सीमा-आरक्षिबलस्य संघर्ष-सम्बन्धितं सामाजिक-सञ्चारमाध्यमेषु प्रसारितं एकं सन्देशं भ्रामकं दुर्भावनापूर्णं च अस्तीति। मन्त्रालयेन उक्तं यत् सन्देशोऽयं राष्ट्रियसुरक्षाया: संवेदनशीलताविषये भ्रामकं, दुर्भावनापूर्णं, द्रोहवृत्तिकरं च अस्ति। सामाजिक-संचारेषु प्रसारिते एकस्मिन् संदेशे मन्त्रालयेन स्पष्टीकृतं यत् आई.टी.बी.पी. इत्यनेन गृह-मन्त्रालयं प्रति एतादृशं किमपि आन्तरिकं प्रतिवेदनं न प्रेषितम् अस्तीति।

## जम्मू-कश्मीर – अमरनाथयात्रा

द्वापञ्चाशद्दिनात्मकायै श्रीअमरनाथयात्रायै श्रीअमरनाथ-श्राइन-बोर्ड इत्यनेन अद्यारभ्य पञ्जीकरणकार्यं प्रचाल्यते। जूनमासस्य एकोनत्रिंशद्दिनाङ्कत: श्रद्धालव: अगस्तमासस्य एकोविंशद्दिनांकपर्यन्तम् अस्यां तीर्थयात्रायां गच्छन्ति।

अन्ते क्रीडावार्तायात्

आई.पी.एल. क्रिकेट् क्रीडामालायां रॉयलचैलेन्जर्स बैंगलुरूदलम् अद्य बेंगलुरूस्थे एम.चिन्नास्वामीक्रिकेट-क्रीडाङ्गणे सनराइजर्स-हैदराबाद इति दलेन सह संघर्षो विधास्यति, क्रीडाया: प्रसारणं कश्चित्कालानन्तरं सार्धसप्तवादनत: समारप्स्यते। ह्यस्तनक्रीडितायां क्रीडायां विंशति: धावनाङ्कै: चेन्नई-सुपर-किंग्सदलेन मुम्बई-इण्डियन्स इति दलम्, कोलकाता-नाइट-राइडर्स इति दलेन च लखनऊ सुपर जाइंट इति दलं पराजितम्।

।। इति वार्ता: ।।